This question paper contains 8 printed pages]

# HPAS (M)—2015

## SANSKRIT

## Paper II

*Time : 3 Hours* *Maximum Marks* : 150

**नोट** :— केवल **पाँच** प्रश्नों के उत्तर दीजिए । प्रश्न संख्या **1** तथा **4** अनिवार्य है । **सभी** प्रश्नों के अंक समान हैं ।

1. 'गद्यं कवीनां निकषं वदन्ति' उक्ति की सार्थकता प्रतिपादित करते हुए बाणभट्ट के काव्यशैलीगत वैशिष्ट्य का निरूपण कीजिए ।

**अथवा**

उत्कर्षकाल के महाकाव्यों का नामोल्लेख करते हुए किरातार्जुनीयम् एवं शिशुपालवध महाकाव्य की तुलनात्मक समीक्षा कीजिए ।

2. ईशावास्योपनिषद् के अनुसार विद्या एवं अविद्या का सोदाहरण निरूपण कीजिए ।

P.T.O.

अथवा

'राजतरंगिणी आधुनिक वैज्ञानिक पद्धति से रचित कश्मीर का ऐतिहासिक विश्वकोश है ।' प्रतिपादित कीजिए ।

3. श्रीहर्ष की नाट्यकला का प्रतिपादन करते हुए रत्नावली नाटिका के वस्तुविन्यास एवं काव्यगत वैशिष्ट्य पर प्रकाश डालिए ।

अथवा

उत्तररामचरित के सन्दर्भ में भवभूति के नाट्यकौशल की समीक्षा कीजिए।

4. निम्नलिखित में से किन्हीं **तीन** श्लोकों की संस्कृत में व्याख्या कीजिए :

(*i*) उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥

(*ii*) अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ॥

(*iii*) इन्द्रियाणि ह्यानाहुर्विषयाँस्तेषु गोचरान् ।

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

(*iv*) अशब्दमस्पर्शमरूपमव्ययं

तथारसं नित्यमगन्धवच्च यात् ।

अनाद्यानन्तं महतः परं ध्रुवं

निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥

5. निम्नलिखित में से किन्हीं **तीन** सूक्तियों की संस्कृत में सप्रसंग व्याख्या कीजिए :

(*i*) याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।

(*ii*) विवेकभ्रष्टानां भवति विनिपातः शतमुखः ।

(*iii*) हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च ।

(*iv*) विभूषणं मौनमपण्डितानाम् ।

(*v*) एतत् पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसक्तम्।

(*vi*) तपसा मनसा वाग्भिः पूजिताः बलिकर्मभिः ।

तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः ।

6. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिन्दी **अथवा** अंग्रेजी में अनुवाद कीजिए :

(क) प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्

समुद्रमपि सन्तरेत् प्रचलदूर्मिमालाकुलम् ।

भुजंगमपि कोपितं शिरसि पुष्पवद् धारयेत्

न तु प्रतिनिविष्टमूर्खजनचित्तं समाराधयेत् ॥

(ख) रणद्भिराघट्टनया नमस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।

स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महती मुहुर्मुहुः ॥

(ग) सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।

आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥

(घ) स्फुरद्धनुर्निस्वनतद्धनाशुग —

प्रगल्भवृष्टिव्यतितस्य संगरे ॥

निजस्य तेजश्शिखिनः परश्शताः

वितेनुरंगारमिवाऽयशः परे ॥

(ङ) अद्रेः श्रृंगं हरति पवनः किंस्विदित्युन्मुखीभिः

दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः ।

स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं,

दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥

7. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिन्दी **अथवा** अंग्रेजी में अनुवाद कीजिए :

(क) किं त्वं पदैर्मम पदानि विशेषयन्ती

व्यालीव यासि पतगेन्द्रभयाभिभूता ।

वेगादहं प्रविसृतः पवनं निरून्ध्यां

त्वन्निग्रहे तु वरगात्रि ! न मे प्रयत्नः ॥

(ख) अद्वैतं सुखदु:खयोरनुगतं सर्वास्ववस्थासु य–
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथम्प्येकं हि तत्प्राप्यते ॥

(ग) भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्तं करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥

(घ) प्रसरसि भयविक्लवा किमर्थं
प्रचलितकुण्डलधृष्टगण्डपार्श्वा ।
विटजननखघट्टितेव वीणा
जलधरगर्जितभीतसारसीव ॥

(ङ) क्षौमं केनचिदिन्दुपाण्डुतरुणामांगल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभः लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–
दत्तान्याभरणानि तत् किसलयोद्भेदप्रतिद्वन्द्विभिः ॥

8. निम्नलिखित में से किन्हीं **तीन** की सप्रसंग व्याख्या कीजिए :

(क) लब्धाऽपि खलु दु:खेन परिपाल्यते । दृढ़गुणपाशसन्दाननिष्पन्दीकृतापि नश्यति । उद्दामदर्पभटसहस्रोल्लासितासिलता पंचरविधृताऽप्यपक्रामति । मदजलदुर्दिनान्धकारगजघनघटापरिपालितापि प्रपालयते । न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते, न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणति, न श्रुतमाकर्णयति, न धर्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमवबुध्यते, न लक्षणं प्रमाणी करोति ।

(ख) केचित् श्रमवशशिथिलशकुनिगलपुटचपलाभि: खद्यातोन्मेषमुहूर्तमनोहराभिर्मनस्विजनगर्हिताभि: सम्पद्भि: प्रलोभ्यमाना:, धनलवलाभावलेपविस्मृतजन्मानोऽनेक-दोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमाना: विविध-विषयग्रासलालसै: पंचभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरा-यास्यमाना: प्रकृतिचंचलतया लब्धप्रसरेणैकेनापि सहस्रतामिवोपगतेन मनसाकुलीक्रियमाणा विह्वलतामुपा-यान्ति ।

(ग) धर्माधर्मौ त्रय्यामर्थानर्थौ वार्तायां नयापनयौ दण्डनीत्याम् ॥ बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोति । प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम । आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥

(घ) परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किंचनत्वं संगत्यागो भैक्षमनेकत्रारण्यवासो बाह्याभ्यन्तरं च शौचम् । सर्वेषामहिंसा सत्यं शौचमनसूयाऽऽनृशंस्यं क्षमा च । स्वधर्मः स्वर्गायानन्त्याय च । तस्यातिक्रमे लोकः संकरादुच्छिद्येत । तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत् । स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति ।

(ङ) अपरिणामोपशमो दारुणोलक्ष्मीमदः । कष्टमनंजनवर्ति-साध्यमपरम् ऐश्वर्यतिमिरान्धत्वम् । अशिशिरोपचार-हार्योऽतितीव्रो दर्पदाहज्वरोष्मा । सततममूलमन्त्रगम्यो विषमो विषयविषास्वादमोहः । नित्यमस्नानशौचबाध्यो रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति विस्तरेणाभिधीयसे । गर्भेश्वरत्वमभिनवयौवनत्वप्रतिमरुपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा ।